श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशमः सर्गः ॥

## श्रीरामेण मुनीनां संरक्षणाय रक्षसां वधाय कृतायाः प्रतिज्ञायाः पालने दृढमवस्थानाय स्वविचारस्य प्रकटनम्

वाक्यमेतत् तु वैदेह्या व्याहृतं भर्तृभक्तया।
श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ जानकीम् ॥ **3.10.1** ॥

हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः।
कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ॥ **3.10.2** ॥

किं नु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः।
क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ॥ **3.10.3** ॥

ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः।
मां सीते स्वयमागम्य शरण्यं शरणं गताः ॥ **3.10.4** ॥

वसन्तः कालकालेषु वने मूलफलाशनाः।
न लभन्ते सुखं भीरु राक्षसैः क्रूरकर्मभिः ॥ **3.10.5** ॥

भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः।
ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ॥ **3.10.6** ॥

अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः।
मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतम् ॥ **3.10.7** ॥

कृत्वा वचनशुश्रूषां वाक्यमेतदुदाहृतम्।
प्रसीदन्तु भवन्तो मे ह्रीरेषा तु ममातुला ॥ **3.10.8** ॥

यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः।
किं करोमीति च मया व्याहृतं द्विजसन्निधौ ॥ **3.10.9** ॥

सर्वैरेव समागम्य वागियं समुदाहृता।
राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः ॥ **3.10.10** ॥

अर्दिताः स्म भृशं राम भवान् नस्तत्र रक्षतु।
होमकाले तु सम्प्राप्ते पर्वकालेषु चानघ ॥ **3.10.11** ॥

धर्षयन्ति सुदुर्धर्षा राक्षसाः पिशिताशनाः।
राक्षसैर्धर्षितानां च तापसानां तपस्विनाम् ॥ **3.10.12** ॥

गतिं मृगयमाणानां भवान् नः परमा गतिः।
कामं तपःप्रभावेण शक्ता हन्तुं निशाचरान् ॥ **3.10.13** ॥

चिरार्जितं न चेच्छामस्तपः खण्डयितुं वयम्।
बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव ॥ **3.10.14** ॥

तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः।
तदर्द्यमानान् रक्षोभिर्दण्डकारण्यवासिभिः ॥ **3.10.15** ॥

रक्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने।
मया चैतद्वचः श्रुत्वा कार्त्स्न्येन परिपालनम् ॥ **3.10.16** ॥

ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे।
संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् ॥ **3.10.17** ॥

मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा।
अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ॥ **3.10.18** ॥

न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः।
तदवश्यं मया कार्यमृषीणां परिपालनम्॥ **3.10.19**॥

अनुक्तेनापि वैदहि प्रतिज्ञाय कथं पुनः।
मम स्नेहाच्च सौहार्दादिदमुक्तं त्वया वचः॥ **3.10.20**॥

परितुष्टोऽस्म्यहं सीते न ह्यनिष्टोऽनुशास्यते।
सदृशं चानुरूपं च कुलस्य तव शोभने।
सधर्मचारिणी मे त्वं प्राणेभ्योऽपि गरीयसी॥ **3.10.21**॥

इत्येवमुक्त्वा वचनं महात्मा
    सीतां प्रियां मैथिलराजपुत्रीम्।
रामो धनुष्मान् सह लक्ष्मणेन
    जगाम रम्याणि तपोवनानि॥ **3.10.22**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे दशमः सर्गः॥